No. ८०३-घ

Title ध्वन्यालोक लोचनम्

Author आनन्दवर्धन: । अभिनवगुप्त:

Extent १८१ Age ६

Subject अलङ्कारशास्त्रम्

ध्वन्यालोचनम् काव्यालोक
लोचनसहितम्

८०३

२८१ पत्र

नं० ८०१८
ध्वन्यालोकलोचन
१६१ पत्राणि

कर्ता: आनन्दवर्धनः अभिनवगुप्तः

ध्वन्यालोचनं सटीकं १८२
६०००

ॐस्वस्तिश्रीगणेशायनमः ॥ अपूर्वंयद्वस्तुप्रथयतिविनाकारणकलां जगद्ग्रावप्रख्यंनिजरसभरात्सारयतिच
क्रमात्प्रख्योपाख्याप्रसरसुभगंभासयतितत्सरस्वत्यास्तत्त्वंकविसहृदयाख्यंविजयताम् ॥ भट्टेन्दुराजचरणाब्ज
कृताधिवासहृद्यश्रुतोभिनवगुप्तपदाभिधोऽहम् यत्किंचिदप्यनुरणन्स्फुटयामिकाव्यालोकंसुलोचननियोजन
याजनस्य ॥ स्वयमविच्छिन्नपरमेश्वरनमस्कारसंपत्तिचरितार्थोपिव्याख्यातृश्रोतृणामविघ्नेनाभीष्टव्याख्याश्रव
णलक्षणफलसंपत्तयेसमुचिताशीःप्रकटनद्वारेणपरमेश्वरसांमुख्यंकरोति वृत्तिकारःस्वेच्छेत्यादिना ॥
मधुरिपोर्नखाःयुष्मान्व्याख्यातृश्रोतॄन्त्रायन्ताम् तेषामेवसंबोधनयोग्यत्वात् संबोधनसारोहियुष्मदर्थः त्राणं
चाभीष्टलाभंप्रतिसाहाय्यकाचरणम् तच्चतत्प्रतिद्वन्द्विविघ्नापसारणादिनाभवतीति इयदत्रत्राणंविवक्षितम्
नित्योद्योगिनश्चभगवतोऽस्मन्मोहाद्यपवसाययोगित्वेनोत्साहशीलतेतिवीररसोध्वन्यते नखानांप्रहरणत्वे प्रहरणे
नवरक्षणेकर्तव्येनखानामव्यतिरिक्तत्वेनकरणत्वात्सातिशयशक्तिताकर्तृत्वेनसूचिता ध्वनितश्चपरमेश्वरस्याव्य
तिरिक्तकरणापेक्षाविरहः मधुरिपोरित्यनेनतस्यसदैवजगत्त्रासापसारणोद्यमउक्तः कीदृशस्यमधुरिपोःस्वे
च्छयाकेसरिणोनतुकर्मपारतंत्र्येण नाप्यन्मदीयेच्छया अपितुविशिष्टदानवहननोचिततयाविधेच्छापरि
ग्रहौचित्यादेवस्वीकृतसिंहरूपस्येत्यर्थः कीदृशानखाःप्रपन्नानामार्तिंयेछिन्दन्ति नखानांहिछेदकत्वमुचितम्
आर्तेःपुनश्छेद्यत्वं नखान्प्रत्यसंभावनीयमपितदीयानांनखानां स्वेच्छानिर्माणौचित्यात्संभाव्यतएवेतियावत् ।
अथवात्रिजगत्कंठकोहिरण्यकशिपुर्विश्वस्यार्तिस्तच्छोकइतिसर्ववस्तुतःप्रपन्नानांभगवदेकशरणस्थितानां १

जनानांमार्तिंकारित्वान्मूर्नैर्वार्तिः तंविनाशयद्भिर्नार्तिरेवोच्छिन्ना भवतीतिपरमेश्वरस्यतस्यामप्यवस्थायांकारुणिकत्व
मुक्तम्. किंवतेगुणः स्वच्छेनस्वच्छतागुणेन नैर्मल्येनस्वच्छमृडयमनयोर्द्विग्वणतयाभावहृत्वयएव स्वच्छायथावक्र
रूपयद्रूपयायाच्छकृत्या यायासितःख्रिद्विनइंदुः यैः अत्रार्थपाक्षवर्णनमूलेनधनिनाबालचंद्रत्वंधन्यते शायासेनहत्सद्वि
योवेदस्यविच्छायत्वप्रतीतिः अपच्छायत्वप्रतीतिश्वधन्यते शायासकारित्वंचनखानांस्वप्रसिद्धं नतद्वचिनखानांलोकोत्तरेण।
रूपेणप्रतिपादितम्. किंचतदीयास्वच्छतांकुटिलिमानंचावलोक्यबालचंद्रः स्वात्मनिविद्रमनुभवति तस्यापिस्वच्छ
कुटिलाकारयोगेप्यमीषपत्रार्तिनिवारणकुशलानत्वहमितिव्यतिरेकालंकारध्वनिः किंवाहंपूर्वमेकएवासाथा

ॐ नमः शिवाय ॥ ॐ स्वच्छाके सति गुणः स्वच्छत्वच्छायायासितेन्दवः त्रायेतांवोमखविपोः प्र-
पन्नार्तिच्छिदो नखाः १ ॥

एणैवशापग्रस्ताकारयोगात्समस्तजनाभिलषणीयताभाजनमभवमद्यपुनरेवंविधादृशाबालचन्द्राकाराः संतापार्तिच्छे
दकाःशस्त्राश्चतितानेवलोकोबालेंदुंबहुमानेनपश्यति. नतुमामित्याकलय्यत्वबालेंदुरविरतमायासमनुभवतीत्युत्प्रे
क्ष्यते इत्यस्त्रेक्षापह्नुतिध्वनिरपि एवंवस्त्वलंकाररसभेदेनत्रिविधध्वनिरत्रश्लोके सह्रदयैभिर्व्याख्यातः अत्रप्रथमश्लोकेना
भिधेयस्वरूपमभिदधत्प्रधानतया प्रयोजनप्रयोजनंतत्संबद्धंप्रयोजनंचसामर्थ्यात्प्रकटयन्नादिवाक्यमाह १ ॥

ॐ· ध्वन्यालो· २

काव्येति काव्यात्मशब्दसन्निधानाद्बुधशब्दोऽत्र काव्यात्मावबोधनिमित्तक इत्यभिप्रायेण विवृणोति ॥ काव्यतत्त्वविद्भिरिति
आत्मशब्दस्य तत्त्वशब्देनार्थो विवृत एवातः सारत्वमपरशब्दवैलक्षण्यकारित्वं च दर्शयति इति शब्दः स्वरूपपरत्वं ध्वनिश
ब्दस्याचष्टे तदर्थस्य विवादास्पदीभूततया निश्चयाभावे सर्वथैव तत्प्रयोगात् यत्तद्विवृणोति संज्ञित इति वस्तुतस्तु न त
त्संज्ञामात्रेणोक्तमपि तु प्रत्येकं ध्वनिशब्दवाच्यं प्रस्तुतसमस्तसारभूतं तत्त्वमन्यथा तु प्रास्ताहेशमामनेयुः [कथ्येयत्नु]

ॐ काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वस्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये के
चिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥ बुधैः
काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिसंज्ञितः परम्परया यः समाम्नातः समाख्यातः तस्य सहृद
यजनमनःप्रकाशमानस्याप्यभावमन्ये जगदुः तदभाववादिनां चामी विकल्पाः संभवन्ति ॥

इत्यभिप्रायेण विवृणोति तस्य सहृदयेत्यादिना एवं त्वयुक्ततरं इति शब्दोऽभिन्नक्रमं वाक्यार्थपरामर्शकः।
ध्वनिलक्षणोऽर्थः काव्यस्यात्मेति यः समाम्नातः शब्दपरामर्शकत्वे हि ध्वनिसंज्ञितोऽर्थ इति का संगतिः एवं हि
ध्वनिशब्दः काव्यस्यात्मेत्युक्तं भवेत् विप्रतिपत्तिविषयमाहेति यथा न च विप्रतिपत्तिस्थानमसदेव प्रस्तुतस्यैव धर्मि
णो धर्ममात्रकृता विप्रतिपत्तिरित्यलमप्रस्तुतेन भूयसा सहृदयजनो हृदजनेन तु यस्यैकस्य ग्रामादिकमपि

ध

श्रुताः

तथाभिधाने स्यात्तत्र भूयसां तदुक्तम् तेन बुधैरिति बहुवचनम् एतदेव व्याचष्टे परम्परयेति अविच्छिन्नेन प्रवाहे।
ण तैरेतदुक्तं विनापि विशिष्टपुस्तकेषु विवेचनादित्यभिप्रायः नच बुधा भूयांसोऽनादरणीयं वस्तु आदरेणोपदिशेयुव
तत्सादरेणोपदिष्टं तदाह सम्यगाम्नातपूर्वइति पूर्वग्रहणेनेदं प्रथमतया नात्र संभाव्यत इत्याह व्याचष्टे समाख्यात :
सम्यगासमन्तात्ख्यातः प्रकटितइत्यनेन तस्येति यस्यापि गमायप्रस्तुतयत्नतो येकातत्राभावसंभावना अतः किञ्च
मेः अपारं मौर्ख्यमभाववादिनामिति भावः नचास्माभिरभाववादिनो विकल्पाः कृताः किंतु संभाव्य दूषयिष्यन्ते अतः प

केचिदाचक्षीरन् शब्दार्थशरीरं तावत्काव्यं तत्र शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा ए
व अर्थगताश्चोपमादयः वर्णसंघटनाधर्माश्च ये माधुर्यादयः तेऽपि प्रतीयन्ते तदनति
रिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः ता अपि गताः श्रवणगोचर
म् रीतयश्च वैदर्भीप्रभृतयः तद्व्यतिरिक्तः कोऽयं ध्वनिर्नामेति ॥२॥

रोक्तत्वं नच भविष्यद्वस्तु दूषयितुं शक्यम् अनुत्पन्नत्वादेव तदपि बुद्ध्यारोपितं दूष्यते इति चेद् बुद्ध्यारोपितत्वादेव भविष्यत्त्व।
हानिः अतो भूतकालोन्मेषात् परोक्ता हि शिष्टाः प्रयत्नानन्तरप्रतिभानाभावाल्लिट्प्रयोगः कृतो जगदुरिति तद्व्याख्यानायैव
संभाव्य दूषणं प्रकटयिष्यतिसंभावनापि नेयमसंभवतोऽयुक्ता अपितु संभवत एव। अत एवासंभावनानामभिधायिष्यमा।
णानां समर्थयितुं पूर्वं संभवतीत्याह संभाव्यते इति तु यमानं पुनरुक्तार्थमेव स्यात् नच संभवस्य संभावना अपितु वर्तमान

पर्यवसानं स्यात् दूषणानां वा।
अतः संभावनानाम = २

चे २३

ध्व- तैवस्फुटेतिवर्तमानेनैवनिर्देशः नन्वसंभवद्वस्तुमूलयासंभावनयायत्संभावितंतद्रूपयित्वमशकामित्याशंक्याह
न्यालो विकल्प्यइति ननुवस्तुसंभवतिनाहक यतइयंसंभावनाप्यपितुविकल्पएव तेवतद्भावेनाथवेध्यनयास्फुरेदपि स
२ तयवांदीर्घनित्यादयोत्रसंभावनाविषयालिङ्गप्रयोगाश्चतीतपरमार्थाएव पर्यवस्यंतीति यथा यदिनामास्यकायस्ययदे
तस्तहद्विर्भवेत देहमादायलोकोयंपुनःकाकाश्चवारयेत ॥ इत्यत्रार्थाद्यद्येवंकायस्यदृष्टतास्यात्तदेवमवलोकोते
तिभूतप्राणनैव यदिनस्यात्ततःकिंस्यादित्यनेनापिकिंकृतंयदिनपूर्वभवनस्यसंभावनेन्ययमेवार्थइत्यलमप्रकृतेनबहु
ना तत्रसमयापेक्षणेनशब्दार्थप्रतिपादकइतिकृत्वावाच्यव्यतिरिक्तेनास्तिव्यंग्यं सदपिवातदभिप्रायेणात्राप्तिनं शाब्दाव
गतार्थवलाकृष्टत्वाद्वाक्यम तदनादिमस्मपिवानवक्तुंशक्यम् कुमारीष्विवभर्तृसुखमतद्विदस्त्विति तथ्यैवेतप्रथा
नविप्रतिपत्तिप्रकाराः तत्राभावविकल्पस्यत्रयःप्रकाराः शब्दार्थगुणालंकाराणामेवशब्दार्थशोभाकारित्वाल्लोकप्र
सिद्धातिरिक्तसुन्दरशब्दार्थमयस्यकाव्यस्यानन्यशोभाहेतुःकश्चिदन्योस्ति योस्माभिर्नगणितइतिएकःप्रकारः
योवानगणितःसशोभाकार्येवनभवतीतिद्वितीयः अथशोभाकारीभवतितर्हिअस्मदुक्तेएवगुणेवालंकारेवांतर्भ
वतिनामांतरकरणेनकियदिदंपांडित्यम् अथाप्युक्तेषुगुणेष्वलंकारेषुवानांतर्भावस्तथापिकेचिद्विशेषलेशमा
श्रित्यनामांतरमात्रकरणमुपमाविच्छित्तिप्रकाराणामसंख्यत्वात तथापिगुणालंकारव्यतिरिक्ताभावएव नावन्मात्रे
णवकिंकृतमन्यस्यापिवैचित्र्यस्यशक्योस्त्येवनत्वाच्छिंतनैर्हिभरतमुनिप्रभृतिभिर्यमकोपमेएवशब्दार्थालंकारत्वे
नेष्टे तत्प्रपंचदिकप्रदर्शनंतनत्वन्यैरलंकारैर्हृतम् तत्रयथाकर्मणएवात्मनस्त्रकंभकारादुदाहरणे स्फुटत्वस्वयंनगाव २

कार

कारादिशब्दार्थस्येष्यते तावत्ताकस्मात्तन्निबद्धमानः एवं प्रकृतेपीति तृतीयः प्रकारः। एवमेकस्मिन्याविकल्पेऽनेकत्र द्वा।
विति पंचविकल्पा इति तात्पर्यार्थः तानेव क्रमेणाह शब्दार्थशरीरं तावदित्यादिना तावद्ग्रहणेन कस्याप्यत्र न विप्रतिपत्तिरिति
दर्शयति तत्रेति शब्दार्थौ न तावद्ध्वनिः संज्ञामात्रेण हि को गुणः अतः शब्दार्थयोर्यत्तच्चारुत्वं स ध्वनिः तथापि द्विविधं चारुत्वं स्वरूप
मात्रकृतं चारुत्वं शब्दालंकारेभ्यः संघटनाश्रितं तु शब्दगुणेभ्यः एवमर्थानां चारुत्वं स्वरूपनिष्ठमुपमादिभ्यः संघटनाप
र्यवसितं त्वर्थगुणेभ्य इति न गुणालंकारव्यतिरिक्तो ध्वनिः कश्चित् संघटनाधर्म इति शब्दार्थयोरिति शेषः यद्गुणा
लंकारव्यतिरिक्तं तच्चारुत्वकारि न भवति नित्यानित्यदोषा असाधुदुःश्रवादय इव चारुत्वहेतुश्च ध्वनिस्तन्न तद्व्य
तिरिक्त इति व्यतिरेकी ननु वृत्तयो रीतयश्च यथा गुणालंकारव्यतिरिक्ताश्चारुत्वहेतवश्च तथा ध्वनिरपि तद्व्यतिरि
क्तश्चारुत्वहेतुश्च भविष्यतीत्यसिद्धो व्यतिरेक इत्यनेनाभिप्रायेणाह न तदतिरिक्ता वृत्तय इति नैव वृत्तिरीतीनां तद्व्य
तिरेकित्वं सिद्धम् तथा ह्यनुप्रासादीनामेव दीप्तमसृणमध्यमवर्णनीयोपयोगितया परुषत्वललितत्वमध्यम
स्वरूपविवेचनाय वर्गत्रयसंपादनार्थं तिस्रोऽनुप्रासजातयो वृत्तय इत्युक्ताः वर्तन्तेऽनुप्रासभेदा आस्विति यदाह सरूप
व्यंजनन्यासं तिसृष्वेतासु वृत्तिषु पृथक् पृथगनुप्रासमुशन्तीति पृथक् पृथगिति परुषानुप्रासः उपनागरिका
नुप्रासः उपनागरिका ललिता नागरिकया विदग्धयाउपमितेति अत एव वैदग्ध्यविहीनस्वभावसुकुमारा
परुषा ग्राम्या वनितासादृश्यादियं वृत्तिर्ग्राम्येति तृतीयः कोमलानुप्रासरूपयोऽनुप्रासजातय एव न वेदर्भवैभा
षिकवृत्तिर्विवक्षिता येन जातो जातिमतो वर्तमानत्वं न स्यात्तदनुग्रहरूप एव हि न त्ववर्तमानत्वे यथाह कश्चित्

ध
न्यालो·
ध
५

लोकोत्तरे हि गांभीर्ये वर्तंते पृथिवीभुज इति तस्माद्धृदयेनानुप्रासादिभ्यो नतिरिक्तं हृदयेनाभ्यधिकव्यापारः अत एव
व्यापारभेदाभावान्न पृथगनुमेयस्वरूपं प्रतीतिहृत्रिपाठस्य व्यापारवाचिनो भिप्रायः अनतिरिक्तत्वादेव हृत्तिव्यवहारो
भामहादिभिर्न कृतः तद्भट्टादिभिः प्रयुक्तेपि तस्मिन्नर्थः कश्चिदधिको ऽस्त्येप पद्यमवतीर्ण इत्यभिप्रायेणाह गताः।
श्रवणगोचरमिति निरीतयश्चेति तदनतिरिक्तहृत्तयोपि गताः श्रवणगोचरमिति संबंधः नह्यतिरिक्ता इति तच्छेदे
नात्र माधुर्यादयो गुणास्तेषां च समुचितवर्णनया यदन्योन्यमेलनक्षमत्वेन पानक इव गुडमरिचादिरसानां संघातरू
पतागमनं दीप्तललितमध्यमवर्णनीयविषयं गौडीयवैदर्भपांचालदेशहेवाकप्राचुर्यदृशा तदेव त्रिविधं रीतिः।
रिश्वक्रम जातिर्जातिमतो नान्या समुदायश्च समुदायिभ्यो नान्य इति हि रीतिर्न यानगुणालंकारव्यतिरिक्ता इति स्थि
तमेवासौ व्यतिरेकी हेतुः तदाह कोयं ध्वनिः नैव चारुत्वस्थानं शब्दार्थस्वरूपत्वाभावात् नापि चारुत्वहेतुः गुणालं
कारव्यतिरिक्तत्वादिति तेनायं उद्भटादिसमाम्नायमपि काव्यमपोद्धारबुद्ध्यापदादिविभज्यते तत्रापि न ध्वनिश
ब्दवाच्यो न कश्चिदतिरिक्तो लभ्यते इति न्याय्यम शब्देनाह ॥२॥

ध

इति नामसमवेनाह ननु माभूदसौ शब्दार्थस्वभावो मा च भूच्चारुत्वहेतुः येन गुणालंकारव्यतिरिक्तो सौनस्मादित्यापोद्धृ तीयमभाववादप्रकारमाह अन्य इति भवत्वेवं तथापि नास्त्येव ध्वनिर्योहि शास्त्रव लिलक्षयिषितः काव्यस्य सौ कश्चिद्रूप्यः न चासौ नृत्तगीतहास्यादिस्थानीयः काव्यस्य कश्चित कवनीयं काव्यं तस्य भावः काव्यत्वं नवनृत्यादि कवनी

ऽेप्यन्ये ब्रूयुः नास्त्येव ध्वनिः प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः सहृ दयहृदयाह्लादि शब्दार्थमयत्वमेव काव्यलक्षणं नचोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सं भवति नच तत्समयान्तःपातिनः सहृदयान्कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोपि सकलविद्वन्मनोग्राहितामवलंबते २॥

यमित्युच्यते प्रसिद्धेति प्रसिद्धं प्रस्थानं शब्दार्थौ गुणाअलंकाराश्चेति प्रतिष्ठंते परम्परया विहरंति येन मार्गेण तत्प्रस्थानं काव्यप्रकारस्येति काव्यप्रकारत्वेन सतत मार्गोभिप्रेतः काव्यस्यात्मत्वज्ञत्वात् ननु कस्मात्काव्यं न भवति इत्याह स हृदयेति मार्गस्येति नृत्तगीतादि ध्वनिनिकोचनादिप्राय स्येत्यर्थः तदिति सहृदयेत्यादि काव्यलक्षणमित्यर्थः

ते=७ द्वा

ध्व॰ न्यालो ५ 5 एव

ननु ये तादृशमपूर्वं काव्यरूपतया जानंति त एव सहृदयाः तदभिमतत्वं च नाम काव्यलक्षणमुक्तं च नाम काव्यल
क्षणमुक्तं प्रस्थानातिरेकिणा एवं भविष्यतीत्याशंक्याह नैवेति यथा खञ्जलक्षणं करोमीत्युक्त्वा आत्मानं विना नात्मा प्रावि
यमाणः सकलदेहाच्छादकः सुकुमारश्चित्रतंतुविचितः संवर्तननिवर्तनसहिष्णुरच्छेदकः सुच्छेद्य उत्कृष्टः खञ्ज इ
ति ब्रुवाणः परैः पटः खल्वेवंविधो भवति न खञ्ज इति अनुयुक्तस्तया पर्यनुयुज्यमान एवं ब्रूयात् ईदृश एव खञ्जो मयाभि
मत इति तादृगेवैतत् प्रसिद्धं हि लक्ष्यं भवति न कस्मिंश्चिदिति भावः तदाह सकलविद्वदिति विद्वांसो हि तत्
समयज्ञा भविष्यंतीत्याशंकां सकलशब्देन निराकरोति एवं हि कृतेऽपि न किंचित्कृतं स्यादुन्मत्ततापरं प्रकटितेति भा
वः यत्त्वत्राभिप्रायं व्याचक्षते जीवितभूतो ध्वनिस्तावत्त्वयाभिमतो जीवितं च नाम प्रसिद्धप्रस्थानातिरिक्तमलंकारका
रैरनुक्तत्वात् तच्छून्यं काव्यमिति लोके प्रसिद्धमिति तस्येदं सर्वं स्ववचनविरुद्धं यदि हि तत्काव्यस्यानुग्राहकं तेन
नांगीकृतं सर्वपक्षवादिना तत्स्थिरं तेनेदमनुक्तमिति प्रत्युत लक्षणं नष्टमेव भवति तस्मात्त्वाकृत एवात्राभिप्रायः

पि

ध्वनि स्थीकर्त्री

३॥

ननु भवतु सौचारुत्वहेतुः शब्दार्थगुणालंकारान्तर्भूतस्य तथापि ध्वनिरित्यपूर्वया भाषया जीवितमित्यसौ नवीनविडम्ब
इत्यभिप्रायमाशंक्य तृतीयमभाववादमुपन्यस्यति पुनरपरे इति कामनीयकमिति कमनीयस्य कर्म वा रूपं चारुत्वहेतुरिति

पुनरपरे तस्याभावमन्यथा कथयेयुः। न संभवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकम
नतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्। तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्र
करणे यत्किंचन कथनं स्यात्। किंच वाग्विकल्पानामानन्त्यात्संभवत्यपि वा कस्मिंश्चित्काव्यल
क्षणविधायिभिः प्रसिद्धैरप्रदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति यदेतदलीकसहृदयत्वभावना
मुकुलितलोचनैर्नृत्यते तत्र हेतुं न विद्मः। सहस्रशो हि महात्मभिरन्यैरलंकारप्रकाराः प्रका
शिताः प्रकाश्यन्ते च। न च तेषामेषा दशा श्रूयते। तस्मात्प्रवादमात्रं ध्वनिः। न त्वस्य क्षोदक्षमं त
त्त्वं किंचिदपि प्रकाशयितुं शक्यम्। तथा चान्येन कृत एवात्र श्लोकः। यस्मिन्नस्ति न वस्तु किं
चन मनः प्रह्लादि सालंकृति व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्। काव्यं तद्ध्वनिना सम
न्वितमिति प्रीत्या प्रशंसन् जडो नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥ ॥

तियावत् ननु विच्छित्तीनामसंख्येयत्वात्कश्चिन्नादर्शितो विच्छित्तिरस्माभिर्दृष्टा यानानुप्रासादौ नाविमाधुर्यादौ उक्तलक्षणेऽन्त
र्भवेत् इत्याशंक्याभ्युपगमपूर्वकं परिहरति वाग्विकल्पानामिति वक्तीति वाक् शब्दः। उच्यत इति वाक् अर्थः। उच्यतेऽनयेति वाक्

कर्त्ता

अभिधाव्यापारः न चशब्दार्थवैचित्र्यप्रकारोनेनतः अभिधावैचित्र्यप्रकारोप्यसंख्येयः प्रकारस्तेषांइति सहृदयाः तत्त्वदेतद्गुणो
वालंकारोवा सर्वसामान्यलक्षणेन संगृहीतएव यदाह काव्यशोभायाः कर्त्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलंकाराः
इति ध्वनिर्ध्वनिरितिवीप्सया संभ्रमंसूचयन्नादरं दर्शयति नृत्यतइति नहिलक्षणकृद्भिरप्रयुक्तं काव्यविधातृभिस्तत्क्षुण्णं।
न्नतचमत्कारैः प्रतिपन्नमिति शेषः ध्वनिशब्देनोत्यावरइतिभावः पदार्देशीति स्वयंदर्पः परैश्च स्तूयमानतेत्यर्थः वा
ग्विकल्पवाक्प्रवृत्तिहेतुप्रतिभाव्यापारप्रकारइतिवा तस्मात्प्रवादमात्रमितिसर्वेषामभाववादिनां साधारणउपसंहारः
यतःशोभाहेतुत्वेगुणालंकारेभ्योनव्यतिरिक्तः यतश्चव्यतिरिक्तत्वेनशोभाहेतुः यतश्च शोभाहेतुत्वे विनाद्यस्पदे तस्मा
दित्यर्थः नचेयमभावसंभावना निर्मूलैवहूषितेनमाह तथाचान्येनेति ग्रन्थकृतसमानकालभाविनेवमनोरथनाम्ना
कविना यतोनसालंकृतिश्चनोनमःप्रकाशादि अनेनार्थालंकाराणामभावउक्तः व्युत्पन्नैरचितंचनेववचनैरितिशब्दालं
काराणांवक्रोक्तिरुक्ताप्रसंघटना तद्धन्यमिति शब्दार्थगुणानाम् वक्रोक्तिशब्देनसामान्यलक्षणभावेनसर्वा
लंकाराभावउक्तः इतिकेचित् तैः पुनरुक्तं नपरिस्फुटमित्यलम् धीमतेतिगतानुगतिकानुरागेणेत्यर्थः समति
नेतिजडेनतत्प्रष्टोभ्रूभंगकटाक्षैरेवोत्तरंददन्तत्स्वरूपंकाममाचष्टीनेतिभावः एवमेतेअभावविकल्पाः स्वे
ष्वलाक्रमेणगताः नत्वन्योन्यमसम्बद्धाएव तथाहितृतीयाभावप्रकारनिरूपणोपक्रमेपुनःशब्दस्यायमेवाभिप्रा
यःउपसंहारैकेनसंगच्छते अभाववादस्यसंभावनाप्राणत्वेनभूतत्वमुक्तम् ४॥ ॥

भाक्तनावादस्त्वविछिन्नः तुल्लकेषिभिप्रायेण भाक्तमाहुरितिनित्यप्रवृत्तवर्तमानापेक्षया ऽभिधानम् भज्यतेसेव्यतेपदार्थे
नप्रसिद्धतयोत्प्रेक्ष्यतेइतिभक्तिः धर्मोभिधेयेनसारूप्यादिः ततआगतोभाक्तोलाक्षणिकोर्थः यदाहु अभिधेयेनसामीप्यात्

ॐभाक्तमाहुस्तमन्ये अन्येतंध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः यद्यपिच
ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्योवा न कश्चित्प्रकारः प्र
काशितः तथापिगुणवृत्त्या काव्येषुव्यवहारंदर्शयता ध्वनिमार्गोमनाक्स्पृष्टोल
क्ष्यते इतिपरिकल्प्यैवमुक्तंभाक्तमाहुस्तमन्येइति ५ ॥ ॥

सामीप्यात्समवायतः वैपरीत्यात्क्रियायोगाल्लक्षणा पंचधास्मृतेति गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः
ततआगतोगौणोर्थोभाक्तः भक्तिः प्रतिपाद्ये सामीप्यतैक्ष्ण्यादौश्रद्धातिशयः तांप्रयोजनत्वेनोद्दिश्यततआगतोभाक्तइतिगौणोल

ध्व: न्यालो ८ १

लादात्त्विकस्य मुख्यस्य वार्थस्य भंगो भक्तिरित्येवं मुख्यार्थबाधानिमित्तप्रयोजनमिति त्रयसद्भाव उपचारबीजमित्युक्तं भव
ति काव्यात्मानं गुणवृत्तिरिति सामानाधिकरण्यस्यायं भावः यद्यप्यविवक्षितवाच्ये ध्वनिभेदे निःश्वासान्ध इवादर्श इत्यादा
वुपचारोस्ति तथापि न तदात्मैव ध्वनिस्तद्व्यतिरेकेणापि भावात् विवक्षितान्यपरवाच्यप्रभेदादौ विवक्षिते वाच्ये उपचार एव न ध
निरिति वक्ष्यामः तथा च वक्ष्यति भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया कस्यचि
द्ध्वनिभेदस्य सा तु स्यादुपलक्षणमिति च गुणाः सामीप्यादयो धर्मास्तैक्ष्ण्यादयश्च तैरुपायैर्वृत्तिरर्थान्तरे यस्य तैरुपायैर्वृ
त्तिर्वा शब्दस्य यत्र स गुणवृत्तिः शब्दोर्थो वा गुणद्वारेण वा वर्तमानं गुणवृत्तिरमुख्योभिधाव्यापारः एतदुक्तं भवति ध्वनतो
ति वा ध्वन्यत इति वा ध्वननमिति वा यदि ध्वनिस्तथाप्युपचरितशब्दार्थव्यापारातिरिक्तो नासौ कश्चित् मुख्यार्थेभिधैवेति
पारिशेष्यादमुख्य एव ध्वनिस्तृतीयराश्यभावात् ननु केनैतदुक्तं ध्वनिर्गुणवृत्तिरिति आशंक्याह यद्यपि चेति अन्यो
चेति गुणालंकारप्रकार इति यावत् दर्शयतेति भट्टोद्भटवामनादिना भामहोक्तं शब्दश्छन्दोभिधानार्थ इति अभि
धानस्य शब्दाद्भेदं व्याख्यातुं भट्टोद्भटो बभाषे शब्दानामभिधानमभिधाव्यापारो मुख्यो गुणवृत्तिश्चेति वामनेनापि सादृ
श्याल्लक्षणा वक्रोक्तिरिति मनाक् स्पृष्ट इति तैस्तावद् ध्वनिर्दिगुन्मीलिता यथा लिखितपाठकैस्तत्स्वरूपविवेकं क
र्तुमशक्नुवद्भिस्तत्स्वरूपविवेको यतः प्रयत्नेनोपालभ्यते अभग्ननारिकेलकल्पयथाश्रुतग्रंथोद्ग्रहणमात्रेणेति ।
अतएवाह परिकल्प्यैवमुक्तमिति यद्येवं न योज्यते तदा ध्वनिमार्गः स्पृष्ट इति पूर्वपक्षाभिधानं विरुध्यते ५ ॥ ८

शालीनबुद्धय इति अप्रगल्भमतय इत्यर्थः। एतेन त्रयस्त्वत्रतोत्रभव्यबुद्धयः प्राच्यादिविपर्यस्ता एव सर्वथामथ्यमात्मतत्त्वस्व
रूपे ज्ञानानाम् अपि सन्देहेनापह्नुवते अन्त्यास्त्वनपह्नुवाना अपि लक्ष्यापितत्त्वं न जानन्ते इति क्रमेण विपर्यासससन्देहाज्ञानप्रथा।

केचित्तु नलक्षणकरणशालीनबुद्धयो धनेस्तत्रैविरामगोचरं सच्चिदयच्चिदयसंवेद्यमेव समा
ख्यातवन्तः तेनैवं विधास्तु विमतिषु स्थितास्तु सच्चिदयमनः शीतयन्तत्त्वरूपं रूमः तस्याहिध्वनेः
स्वरूपे सकलसत्त्वविकासोपनिषद्भूतम् अनिरमणीयमलीयसीभिरपिचित्रैरंतनकाव्यलक्षणैः।
विधायितो बुद्धिरुन्मीलितपूर्वम् अथ च रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्ध।
व्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते १ ॥ ॥

न्यमेषां तेनेति एकैकोप्ययं विषतिपत्तिरूपो वा कार्यो निरूपणहेतुत्वं प्रतिपद्यते इत्येकवचनम् एवं विधास्तु विमतिष्विति ॥

ध्व.
न्यालो.
८
8

निर्धारणे सप्तमी। तत्र मध्ये एकोपि यो विमतिप्रकारस्तेनैव हेतुना तत्स्वरूपं ब्रूम इति ध्वनिस्वरूपमभिधेयम्। अभिधाना-
भिधेयलक्षणयोर्द्वयोः शास्त्रयोर्वक्तृश्रोत्रोर्व्युत्पाद्यव्युत्पादकभावः संबन्धो विमतिनिवृत्त्या तत्स्वरूपज्ञानं प्रयोजनम्। शा-
स्त्रप्रयोजनयोः साध्यसाधनभावः संबन्धः। अथ च तत्प्रयोजनप्रतिपादकं सहृदयमनःप्रीतये इति भागं व्याख्यातुमाह। त-
स्यैवेति। विमतिपदपतितस्येत्यर्थः। ध्वनेः स्वरूपं लक्षयतां सर्वेषामपि निमित्तं सहृदये आनन्दो निर्वृत्त्यात्मा चमत्कारापरपर्याय-
प्रति हेयोपादेयविषयी साधु यदुक्तं तेनानुभूयमानेनानुभूयमानं लभतामिति प्रयोजनं संपादयितुं तत्स्वरूपं प्रकाश्यते इति संग-
तिः। प्रयोजनं च नाम तत्संपादकवस्तुप्रयोक्तृताप्रापणं तेन तथा भवतीत्याशयेन प्रीतये तत्स्वरूपं ब्रूम इत्येकवाक्यता
व्याख्यानं तत्स्वरूपशब्दं व्याचक्षाणः संक्षेपेणाभावतः पूर्वोदीरितविकल्पपंचकोद्धरणं प्रथयति सकलेत्यादिना। सक-
लशब्देन सत्कविशब्देन च प्रकारलेशोऽकस्मिंश्चिदिति निराकरोति। अतिरमणीयमिति भाक्ताद्व्यतिरेकमाह। न हि सिंह-
वद्गंगायां घोष इत्यत्र रम्यता काचित्। उपनिषद्भूतशब्देन त्वपूर्वसमाख्यामात्रकरणमित्यादि निराकृतम्। अणीय-
सीभिरित्यादिना गुणालंकारान्तर्भूतत्वं प्रत्यपति अपि चेत्यादिना तन्मनयोनः पातितं इत्यादिना यत्सामयिकत्वं।
शंकितं तन्निरवकाशीकरोति। रामायणमहाभारतशब्देनादिकवेः प्रभृति सर्वैरेव मुनिभिरस्यादरेइ निदर्शयति। लक्षयतामि-
त्यनेन वाचोयुक्तिनाम विषय इति परास्यति। लक्ष्यतेऽनेनेति तत्त्वं लक्षणम्। लक्षणेन निरूपयन्ति तेषां लक्षणद्वारेण निरूप-
यतामित्यर्थः। सहृदयानामिति येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्य-
ता ते हृदयसंवादभाजः सहृदयाः। यथोक्तम् योऽर्थो हृदयसंवादभाजः सहृदयाः। यथोक्तम् योऽर्थो हृदयसंवादीन

शरीरं व्याप्यते तेन शुष्कं काष्ठमिवाग्निनेति आनन्द इति रसस्य चर्वणात्मनः प्राधान्यं दर्शयन् रसध्वनेरेव सर्वत्र मुख्यभूतमात्मत्वमि
ति दर्शयति तेन यदुक्तं ध्वनिर्नामापरो योऽपि व्यापारो व्यञ्जनात्मकः तस्य सिद्धेऽपि भेदे स्यात्काव्यांशत्वं न रूपितेति तदपहस्तितं भव
ति तथा ह्यभिधाभावनारसचर्वणात्मकेऽपि त्र्यंशके काव्ये रसचर्वणा तावज्जीवितभूतेति भवतोऽप्यविवादोऽस्ति यथोक्तं त्वयैव का।
व्ये रसयिता सर्वो न बोद्धा न नियोगभागिति तद्वस्त्वलंकारध्वन्यभिप्रायेणागममात्रत्वमिति सिद्धसाधनम् रसध्वन्यभिप्राये।
ण तु स्वाभ्युपगमप्रसिद्धिसंवेदनविरुद्धमिति तत्र कवेस्तावत्कीर्त्यापि प्रीतिरेव संपाद्या यदाह कीर्तिः स्वर्गफलामाहु
रित्यादि श्रोतॄणां च व्युत्पत्तिप्रीती यद्यपि स्तः यथोक्तं धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च करोति कीर्तिं प्रीतिं च
साधुकाव्यनिबन्धनमिति तथापि तत्र प्रीतिरेव प्रधानम् अन्यथा प्रभुसम्मितेभ्यो वेदादिभ्यो मित्रसम्मितेभ्यश्चे
तिहासादिभ्यो व्युत्पत्तिहेतुभ्यः कोऽस्य काव्यरूपस्य व्युत्पत्तिहेतोर्जायासम्मितत्वलक्षणो विशेष इति प्राधान्येनानन्द
एवोक्तः चतुर्वर्गव्युत्पत्तेरपि चानन्द एव पार्यन्तिकं मुख्यं फलम् आनन्द इति च ग्रन्थकृतो नाम तेन स एवानन्दवर्ध
नाचार्य एतच्छास्त्रद्वारेण सहृदयेषु प्रतिष्ठां देवतायतनादिवदनश्वरीं सिद्धिं गच्छत्विति भावः यथोक्तम् उ
पेयुषामपि दिवं सन्निबन्धविधायिनाम् आस्त एव निरातङ्कं कान्तं काव्यमयं वपुरिति ॥ तथा मनसि प्रकाशमानमि
ति एवंविधस्य मनसः सहृदयचक्रवर्ती खल्वयं ग्रन्थकृदिति यावत् यथा युद्धे प्रतिष्ठापरमार्जुनस्येति स्वनाम प्रक
टीकरणं श्रोतॄणां प्रवृत्त्यङ्गमेव संभावनाप्रत्ययोत्पादनमुखेनेति ग्रन्थान्ते वक्ष्यामः एवं ग्रन्थकृतः कवेः श्रोतुश्च
मुख्यं प्रयोजनमुक्तम् १ ॥ ॥ ॥ ॥

ध्व. तत्रेति एवंभूतेऽस्मिन् प्रयोजने व्यवस्थिते इत्यर्थः ननु ध्वनिस्वरूपं ब्रूम इति प्रतिज्ञाय वाच्यप्रतीयमानाख्यौ द्वौ भेदावर्थस्येति वाच्या
न्यालो भिधाने का संगतिः कारिकाया इत्याशंक्य संगतिं कर्तुमवतारणिकां करोति ध्वनेरेवेत्यादिना भूमिरेव भूमिका यथा पूर्वं निर्मितो
५ विकीर्णैः भूमिरेव विरच्यते तथा ध्वनिस्वरूपे प्रतीयमानाख्ये निरूपयितव्ये निर्विवादसिद्धवाच्याभिधानं भूमिस्तत्पृष्ठे
१ ऽधिकप्रतीयमानांशोल्लिंगनात् वाच्येन समशीर्षिकागणनेन तस्याप्यनपह्नवनीयत्वं प्रतिपादयितुं स्मृतावित्यनेन ॥

ॐ तत्र पुनर्ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥ काव्यस्य हि ललितोचितसंनिवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थः तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ २ ॥ ॥

यः समाम्नातपूर्व इति व्यपदिशति ॥ ॥ ५

शब्दार्थशरीरं काव्यमिति यदुक्तं तत्र शरीरग्रहणादेव केनचिदात्मना तदनुप्राणकेन भाव्यमेव तत्र शब्दास्तावच्छरीरभाग
एव सन्निविशन्ते सर्वजनसंवेद्यधर्मत्वात् स्थूलकृशत्वादिवत् अर्थः पुनः सकलजनसंवेद्यो न भवति नह्यर्थमात्रेण काव्यव्य
पदेशो लौकिकवैदिकवाक्येषु तदभावात् तदाह सहृदयश्लाघ्य इति स एक एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्या
विभज्यते तथाहि तुल्येऽर्थरूपत्वे किमिति कस्मैचित् सहृदयाः श्लाघन्ते तद्भवितव्यं केनचिद्विशेषेण यो विशेषः स प्रतीय
मानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते वाच्यसंवलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्य
ते चार्वाकैरिवात्मपृथग्भावः अत एवार्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इति विशेषणद्वारा हेतुमभिधायापोद्धार
दृशा तस्य द्वौ भेदौ अंशावित्युक्तं न तु द्वावप्यात्मानौ काव्यात्मेति कारिकाभागगतं काव्यशब्दं व्याकर्तुमाह काव्य
स्य हीति ललितशब्देन गुणालंकारानुग्रहणमाह उचितशब्देन रसविषयमेवौचित्यं भवतीति दर्शयन् रसध्वनेर्जीवि
तत्वं सूचयति तदभावे हि किमपेक्षयेदमौचित्यं नाम सर्वत्रोद्घोष्यते इति भावः योऽर्थ इतीयताऽनुवदता सर्वेणाप्य
तत्तावदुपगतमिति दर्शयति तस्येत्यादिना तदभ्युपगम एव द्व्यंशत्वे समनुपपद्यते इति दर्शयति तेन यदुक्तं चारु
त्वहेतुत्वं वादेनैतत्सिद्ध इति दर्शितम् तथात्मा चारुत्वहेतुर्द्वयस्येति भवति अथाप्येवं स्यान्न्यायापि वाच्येनानैकान्ति
को हेतुः न ह्यलंकार्य एवालंकारो गुणी एव गुणः एतदर्थमपि वाच्यांशोपक्षेपः अत एव वक्ष्यति वाच्यः प्रसिद्ध
इति ॥ २ ॥

त्वाद्गुणालंकारव्यतिरिक्तो न ध्वनि॰ रिति तत्त्वाध्वने
रात्मस्वरूप =

ध्व॰ न्यालो॰ १० 10

तत्रेति द्व्यंशात्वेसत्यपीत्यर्थः प्रसिद्ध इति वनितावदनोद्यानेन्दूदयादिर्लौकिक एवेत्यर्थः उपमादिभिः प्रकारैः स

ऽतत्रवाच्यः प्रसिद्धोयः प्रकारैरुपमादिभिः बहुधाव्याकृतः
सोऽन्यैः काव्यलक्ष्मविधायिभिः ततोनेहप्रतन्यते केवल
मनूद्यतेयथोपयोगमिति ८ ॥ ॥

व्याकृतोबहुधेति संगतिः अन्यैरिति कारिकाभागं काव्येत्यादिना चष्टे। ततोनेहप्रतन्यतइति विशेषप्रतिषेधेनशेषाभ्यनुज्ञेति १०
दर्शयति केवलमित्यादिना ० ॥

पुनः शब्दो वाच्याद्विशेषद्योतकः। अन्यदेव वस्त्विति तद्व्यतिरिक्तं सारभूतं चेत्यर्थः। महाकवीनामिति बहुवचनमशेषवि
षयव्यापकत्वमाह। एतदभिधास्यमानप्रतीयमानानुप्राणितकाव्यनिर्माणनिपुणप्रतिभाभाजनत्वेनैव महाकविव्यप
देशो भवतीति भावः। यदेवंविधमस्ति तद्भाति नहि सत्तामात्रेणाभानमुपपन्नं रञ्जनायापि नास्त्येतमसद्भाति अनेन सत्प्रयुक्तं ता
वद्भानमिति भासनात्सत्त्वमवगम्यते तेन यद्भाति तदस्ति तथैतद्युक्तं भवति तेनायं प्रयोगार्थः। प्रसिद्धं वाच्यं यत्प्रतीयमा
नेन व्यतिरिक्तेन तत्तद्वत्प्रथाभासमानत्वाल्लावण्यापेक्षयाङ्गनावत्। प्रसिद्धशब्दस्य शब्दप्रतीतत्वमलंकृतत्वं चार्थः। यत्तद्विनिस्त्वे

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनां। यत्तत्प्रसिद्धावयवातिरिक्तं विभाति ला
वण्यमिवाङ्गनासु॥ महाकवीनां वाणीषु प्रतीयमानं तु वस्तु वाच्याद्यदन्यदेवास्ति यत्तत्सहृद
यसुप्रसिद्धं प्रसिद्धेभ्योऽलंकृतेभ्यः प्रतीतेभ्यो वावयवेभ्यो व्यतिरिक्तत्वेन प्रकाशते लावण्यमिवा
ङ्गनासु। यथा ह्यङ्गनासु लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव स
हृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः। स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंका

नाम समुदायस्य चमत्कारेणाधिकीकरणायं मध्यपदेशवत्त्वमस्यासंवलनात्मकं तं व्यतिरेकप्रमेदस्थानदार्ष्टान्तिकयोर्दर्शयति
तस्य किमपीत्यादिना व्याचष्टे लावण्यं हि नामावयवसंस्थानाभिव्यङ्ग्यमवयवव्यतिरिक्तं धर्मान्तरमेव न चावयवानामेव निर्दोषता
वा भूषणयोगो वा लावण्यं पृथङ्निर्वर्ण्यमानकाणत्वादिदोषशून्यशरीरावयवयोगिन्यामप्यलंकृतायामपि कस्यांचिल्लावण्यामृत
चन्द्रिकेयमिति सहृदयानां व्यवहारात्। ननु लावण्यं तावद्व्यतिरिक्तं प्रथितं प्रतीयमाने किं तदित्येवं न जानीम इत्याह देवैतद्व्यतिरे
कप्रथेति तथाभासमानत्वमप्रसिद्धो हेतुरित्याशङ्क्य सत्यमित्यादिना स्वरूपं तस्याभिधत्ते सर्वथैवेत्यादिना व्यतिरेकप्रथां साधयति

तार=५

लावण्यशून्येयमित्यतथाभूतायामपि=३

ध्व· तत्र प्रतीयमानस्य तावद्द्वौ भेदौ लौकिकः काव्यव्यापारैकगोचरश्च लौकिको यः शब्दवाच्यतां कदाचिदपि शेते स च विधि
न्यालो· निषेधाद्यनेकप्रकारो वस्तुशब्देनोच्यते सोऽपि द्विविधः यः पूर्वं क्वापि वाक्यार्थेऽलंकारभावमुपमादिरूपतयान्वभूदिदानीं त्व
११ नलंकाररूप एवान्यत्र गुणीभावाभावात्स पूर्वप्रत्यभिज्ञानबलादलंकारध्वनिरिति व्यपदिश्यते ब्राह्मणश्रमणन्यायेन तद्रू
पाभावेन तूपलक्षितं वस्तुमात्रमुच्यते मात्रग्रहणेन हि रूपान्तरं निराकृतम् यस्तु स्वप्नेऽपि न शब्दवाच्यो न लौकिक
॥ व्यवहारपतितः किं तु शब्दसमर्प्यमाणहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुराग

सर्वेष्वेव तेषु प्रकारेषु तस्य वाच्यादन्यत्वं तथा ह्याद्यस्तावत्प्रभेदो वाच्याद्दूरं विभेदवान् स हि क
दाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः यथा भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ तेण
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ४ ॥

सुकुमारसंविदानन्दचर्वणाव्यापाररसनीयरूपो रसः स काव्यव्यापारैकगोचरो रसध्वनिरिति स च ध्वनिरेवेति स एव मुख्यत
यात्मेति यत्तु भट्टनायकेनांशत्वेन दूषितेति तदस्त्वलंकारध्वन्योरेव यदि नामोपालम्भो रसध्वनिस्तु तेनैवात्मतयाङ्गीकृ
तो रसचर्वणात्मनः तृतीयस्यांशस्याभिधाभावनांशद्वयोत्तीर्णत्वेन निर्णयात् वस्त्वलंकारध्वन्योः रसध्वनिपर्यन्तत्वमेवेति
वयमेव वक्ष्यामः तत्र नेयं स्तावत् वाच्यसामर्थ्याक्षिप्तमिति निभेदत्रये व्यापकं सामान्यलक्षणं यद्यपि ध्वननं शब्दस्यैव
व्यापारस्तथाप्यर्थसामर्थ्यस्य सहकारिणः सर्वत्रानपायाद्वाच्यसामर्थ्याक्षिप्तत्वम् ॥ ११

तैचेत्याहलौता

शब्दशक्तिमूलानुरणनव्यंग्येष्वर्थसामर्थ्यात्प्रतीयमानावगतिः (तस्या) शब्दशक्तिः केवलमवान्तरकारणे निबद्धा मः इत्यविभेद
वानिति विधिनिषेधौ विरुद्धाविति हि न कस्यचिदपि विमतिः एतदर्थं प्रथमेनावेवोदाहरति भम धम्मिअ इति ॥ भ्रमधा
र्मिक विश्रब्धः स श्वाऽद्य मारितस्तेन गोदावरीकूललतागहनवासिना दृप्तसिंहेन कस्याश्चित्संकेतस्थानं जीवितस
र्वस्वायमानं धार्मिकसंचरणान्तरायदोषात्तद्वल्लूयमानपल्लवकुसुमादिविच्छायीकरणाच्च परित्रातुमियमुक्तिः तत्र स्वतः सि
द्धमपि भ्रमणं श्वभयेनापोदितमिति प्रतिप्रसवात्मको निषेधाभावरूपो न तु नियोगः प्रैषादिरूपोऽत्र विधिरिति सर्गप्राप्तकालयोर्लो
ट् तत्र भावतदभावयोर्विरोधाद्द्वयोस्तावन्न युगपद्वाच्यता न क्रमेण विरम्य व्यापाराभावात् विशेष्यं नाभिधा गच्छे
दित्यादिनाभिधाव्यापारस्य विरम्यासंभवाभिधानात् ननु तात्पर्यशक्तिरपर्यवसिता विवक्षया दृप्तधार्मिकतदादिपदार्था
न्वयरूपमुख्यार्थबाधकत्वेन विरोधनिमित्तया विपरीतलक्षणया च वाक्यार्थीभूतनिषेधप्रतीतिमभिदधाना स्वपदस्थाक
रोतीति शब्दमूल एवायमर्थः एवमनेनोक्तमिति द्विधा व्यवहारः तत्र वाच्यातिरिक्तोऽन्योऽर्थ इति नैतत् त्रयो ह्यत्र व्या
पाराः संवेद्यन्ते पदार्थेषु सामान्यात्मस्वभिधाव्यापारः समयापेक्षार्थावगमनशक्तिर्ह्यभिधा समयश्च तावत्येव
न विशेषांशे आनन्त्याद्व्यभिचाराच्चैकस्य ततो विशेषरूपे वाक्यार्थे तात्पर्यशक्तिः परस्परान्विते सामान्यान्यथासि
द्धेर्विशेषं गमयन्ति हि इति न्यायात् तत्र च द्वितीयकक्ष्यायां भ्रमेति विध्यतिरिक्तं न किंचित्प्रतीयते अन्वयमात्रस्यैव प्रति
पन्नत्वात् न हि गंगायां घोषः सिंहो वटुरित्यत्र यथान्वय एव बुभूषन्निहन्यते योग्यताविरहात्तथात्र भ्रमणनि
षेद्धा स श्वा सिंहेन हतः तदिदानीं भ्रमणनिषेधककारणवैकल्याद्भ्रमणं न वोचितमित्यर्थाच्चान्वयस्य नकाविहतिः

ध्व॰
आलो
१२
12

अत एव मुख्यार्थबाधानात्र शंक्येति न विपरीतलक्षणाया अवसरः भवतु वा सैव तथापि द्वितीयस्थानसंक्रान्ताभावात् सैव न भ
वति तथाहि मुख्यार्थबाधायां लक्षणाप्रवृत्तिः सा च विरोधप्रतीतिरेव न चात्र पदार्थानां स्वात्मनि विरोधः परस्परं विरोध
इति चेत्सोयं तर्ह्यन्वये विरोधः प्रमेयः न वा प्रतिपत्तेरन्वये विरोधप्रतीतिः प्रतिपत्तिश्चान्वयस्य नाभिधाशक्त्या तस्याः पदार्थप्र
तिपत्त्युपक्षीणाया विरम्यव्यापाराद् इति तात्पर्यशक्त्यैवान्वयप्रतिपत्तिः नन्वेवमंगुल्यग्रे करिवरशतमिति अत्राप्यन्वय
प्रतीतिः स्यात् किं न भवत्यन्वयप्रतीतिर्दशदाडिमादिवाक्यवत् किं तु प्रमाणान्तरेण सोन्वयः प्रत्यक्षादिना बाधितः
प्रतिपत्तापि शुक्तिकायां रजतमिवेति तद्वत्प्रकारेणैवास्याप्रामाण्यम् सिंहो माणवक इत्यत्र द्वितीयकक्ष्या निवि
ष्टतात्पर्यशक्तिः समर्पितान्वयबाधकोल्लासानंतरमभिधातात्पर्यशक्तिद्वयव्यतिरिक्ता तावत्तृतीयैव शक्तिस्तद्बाधक शक्ति
विधुरीकरणनिपुणा लक्षणाभिधाना समुल्लसति तन्नैवं सिंहो बटुरित्यत्रापि काव्यरूपता स्यात् ध्वननलक्षणस्यात्मनो
ऽत्रापि समनंतरमेव वक्ष्यमाणतया भावात् ननु घटेपि जीवव्यवहारः स्यादात्मनो विभुत्वेन तत्रापि भावात् शरीरस्य
त्वत्तु विशिष्टाधिष्ठानयुक्तस्य सत्यात्मनि जीवव्यवहारो न यस्य कस्यचिदिति चेत् गुणालंकारौचित्यसुन्दरशब्दा
र्थशरीरस्य सति ध्वननात्मन्यात्मनि काव्यरूपताव्यवहारो न चात्मनोसारताकाविदिति समानं न चैवं भक्तिरेव ध्व
निः भक्तिर्हि लक्षणाव्यापारस्तृतीयकक्ष्यानिवेशी चतुर्थ्यां तु कक्ष्यायां ध्वननव्यापारः तथाहि त्रितयसन्निधौ लक्ष
णा प्रवर्तते इति तावद्भवद्भिरेव प्रतिजानते तत्र मुख्यार्थबाधा तावत्प्रत्यक्षादिप्रमाणान्तरमूला निमित्तं च यदभिधीयते
सामीप्यादि तदपि प्रमाणान्तरावगम्यमेव यत्त्विदं घोषस्यातिपवित्रत्वशीतलत्वसेव्यत्वादिकम् शब्दान्तरवाच्यं प्रमाण १२

तदा प्रतिपन्नं वटोर्वीरपराक्रमातिशयशालित्वं तत्र शब्दस्य तावन्न व्यापारः तथाहि तत्सामीप्याद्गङ्गमित्वानुमानमनैका
न्तिकम् सिंहशब्दवाच्यत्वं च वटोरसिद्धम् अथ यत्र यत्रैव शब्दप्रयोगस्तत्र तत्र तद्धर्मयोग इत्यनुमानान्तरं कथं तथापि व्याप्ति
ग्रहणकाले मौलिकं प्रमाणान्तरं च नास्ति न च स्मृतिरियं अननुभूतेः तद्योगान्नियमाप्रतिपन्नैर्वक्तृभेदैर्विवक्षितमित्यध्यवसा
याभावप्रसंगाच्च त्वसिद्धावदत्र शब्दस्य व्यापारो व्यापारश्च नाभिधात्मा समयाभावात् न तात्पर्यात्मा तस्यान्वयप्रतीतावेव परिक्ष
यात् न लक्षणात्मा उक्तादेव हेतोः स्खलद्गतित्वाभावात् न चापि हि स्खलद्गतित्वे पुनर्मुख्यार्थबाधानिमित्तं प्रयोजनमित्यनव।
स्थास्यात् अत एव यत्केनचिल्लक्षितलक्षणेति नामकृतं तद्व्यसनमात्रम् तस्मादभिधातात्पर्यलक्षणाव्यतिरिक्तश्चतुर्थोसौ व्या
पारो ध्वननद्योतनव्यंजनप्रत्यायनावगमनादिसोदरव्यपदेशनिरूपितोभ्युपगन्तव्यो यद्वक्ष्यति मुख्यां वृत्तिं परित्यज्य गुणवृ
त्त्यार्थदर्शनम् यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिरिति तेन समयापेक्षा वाच्यावगमनशक्तिरभिधाशक्तिः तदन्यथा
नुपपत्तिसहायार्थावबोधनशक्तिस्तात्पर्यशक्तिः मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणाशक्तिः तच्छ
क्तित्रयोपजनितार्थावगममूलजाततत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वननव्यापारः स च प्राग्
वृत्तं व्यापारत्रयं न्यक्कुर्वन्प्रधानभूत एव काव्यात्मेत्याशयेन निषेधप्रतिमुखतया च प्रयोजनविषयोपि निषेधविषय इत्यु
क्तः अभ्युपगममात्रेण चैतदुक्तं न त्वत्र लक्षणात्वेन तिरस्कारात्यसंक्रमणयोरभावात् न त्वर्थशक्तिमूले स्या व्यापारः
सहकारिभेदाच्च शक्तिभेदः स्पष्ट एव यथा तस्यैव शब्दस्य व्याप्तिस्मृत्यादिसहकृतस्य लिङ्गावगतावनुमापकव्यापारः
शब्दादिसहकृतस्य वाचिकस्यत्वव्यापारः शब्दादिसहकृतस्य वाचिकस्यत्वव्यापारः एवमभिहितान्वयवादिनां ताव

वगमस्त्वमूलं तेन जाता
त

चि ऋ

ध. व्याता. १३ 13

दिपदनपह्नवनीयम् योप्यन्विताभिधानवादीयत्परः शाह्नः सशाह्नार्थ इति ...दयेशृद्दीनाशरवदभिधाव्यापारमेव दीर्घ
मिच्छति तस्य पदैर्दीर्घदीर्घो व्यापारस्तदेकोसावितिज्ञनाभिन्नविषयत्वात् यथानेकोसौ न हि विषयसहकारिभेदादस
जातीयपवयुक्तः सजातीये वहिरम्यव्यापारः शह्कर्मबुद्ध्यादीनां पदार्थविद्भिर्निषिद्धः असजातीयेवास्तत्रपय्व अ
पयोसौ वनर्थकत्वान्निविष्टोर्थः सइतिकृदितिवाक्येनाभिधीयते इत्येवं विपदीर्घदीर्घत्वं विवक्षितम् न च तर्हि सं
केताक[..]णात्कथं साक्षात्स्यतिपत्तिः निमित्तेषु संकेतो नैमित्तिकस्त्वसावर्थ इति संकेतानपेक्षप्रवृत्तिर्वोत्पाद्याद्वि य
स्याक्तिकौपालम् यात्सौ पर्यंतकसाभाव्यर्थः प्रथमं प्रतीतिविषयमवगीतेस्तस्य पश्चात्तनाः पदार्थानिमित्तभावं गच्छे
तीति नूनं मीमांसकस्य प्रयोत्तंयति नैमित्तिकत्वमभिमतम् अथोच्यते पूर्वं तत्र संकेतग्रहणसंस्कृतस्य तथाप्रतिपत्तिर्भव
तीत्यनुयावस्तु स्थित्या निमित्तत्वं पदार्थानां तर्हि तदनुसारानुपयोगेन न किंचिद्युक्तं स्यात्र चापि प्राकदार्थेषु संवंध
ग्रहणं हन्त अन्वितानामेव समदायप्रयोगात् आवापोद्वापाभ्यां तथाभावः इति चेत्संकेत। पदार्थमात्र पर्वेस्तु पगमे पा
ख्यात्यैव विशेषपनीतिः अथोच्यते इष्टेव कृदिति तान्यर्थप्रतिपत्तिः किमत्र क्रमः इति नहि दं वयमपि नांगीकुर्मो
यद्वदामः न ह्यसवेतमांसोर्थौ वा व्यार्थौ विसुखोन्मनाम् बुद्धौ न तथावभासिन्यां कृदित्येवावभासने इति किं
न सातिशयानुशीलनाप्यासानुत्रसंभाव्यमानापि क्रमः सजातीय तहि कस्य परम्परानुदयादभ्यासविषयव्याप्तिसि
मयस्त्वतिक्रमवत्र सवेयन इति निमित्तनैमित्तिकभावाच्चावयपय्ववरणीयान्यथा गौणलाक्षणिकयोर्मुख्याद्भेदः स्फुतिलिं
गपरिशमाणवद्धस्य परदौर्बल्यमित्यादिप्रक्रियाविचातो निमित्तता वैविच्येणैवास्याः सामर्थ्यान्निमित्तता वैविच्यं चाभ्युपगम्यते किम १३

तैरप्यविद्यापादपतितैः सर्वैरयमनुसरणीयः प्रक्रियांतदुत्तीर्णत्वेन सर्वैरपरमेश्वरात्मायं ब्रह्मेत्यस्मच्छास्त्रानुसारेणेन विदितं
तं त्रालोकं ग्रन्थं विचारयतेत्यास्ताम्। यत्तु भट्टनायकेनोक्तमिदं त्वमसि हादिपदयोगेपि धार्मिकपदप्रयोगे च भयानकरसावेशकृते
वनिषेधावगतिस्तदीयभीरुधीरत्वप्रकृतिनियमावगमं मे तदेरैकांतेनानिषेधगम्यभावादिति तन्नकेवलार्थसामर्थ्यान्निषेधग
तेर्निमित्तमिति तत्रोच्यते केनोक्तमेतद्वक्तृप्रतिपत्तृविशेषावगममविरहेण शब्दगतध्वननव्यापारविरहेण च निषेधावगतिरिति
प्रतिपत्तृवक्तृप्रतिभासहकारित्वं त्वस्माभिर्द्योतनस्य प्राणत्वेनोक्तम्। भयानकरसावेशश्च न वर्णेप्स्य भयमात्रोत्पत्त्युपगमात्। प्रति
पत्तुश्च रसावेशोऽस्माभिर्व्यञ्जकरसस्य च शब्दवाच्यत्वं तेनापि नोपगतमिति व्यंग्यत्वमेव प्रतिपत्तुरपि रसावेशो नियतः। न ह्य
सौ नियमेन भीरुधार्मिकस्य सप्रत्ययत्वादिहृदय एव। अपि तु हि रोषोऽपि सहकारी कल्प्यते तर्हि वक्तृप्रतिपत्तृप्रतिभाप्र
णितो ध्वनव्यापारः किं न सह्यते। किंच वस्तुध्वनिं दूषयता रसध्वनिस्तदनुग्राहकः समर्थ्यत इति सुष्ठुतरां ध्वनिध्वंसो
यं। यदाह क्रोधोऽपि देवस्य वरेण तुल्य इति। अथ रसस्यैव यत्नाशथान्यथानुक्तं तत्को न सहते अथ वस्तुमात्रध्वनेर्नेतदुदाहर
णं न युक्तमित्युच्यते तथापि कार्योदाहरणत्वाहावप्यत्रध्वनीत्यां को दोषः यदि तु रसानुवेशेन विना न तुष्यते तद्भ
यानकरसानुवेशोपि नात्र संपद्यते पर्यवर्णमथ्याम अपि तु कनीत्याः संभोगाभिलाषविभावसंकेतस्थानोचितवि
शिष्टकाकाप्यनुभावसंवलनोचितशृंगाररसानुवेधो रसस्यालौकिकत्वाद्भावनामात्रादेव चानवगमात्त्वयमं नित्यं
वादसिद्धविविक्तविधिनिषेधप्रदर्शनाभिप्रायेणैवैतद्वस्तुध्वनेरुदाहरणं दत्तम्। यत्तु ध्वनतिव्याख्यानोपयतत्वाख्यं
शक्तिमेव विवक्षात्मकत्वमेव वाध्वननं न मवोवन्सनास्माकं हृदयमावर्जयति यदाहुः भिन्नरुचिर्हि लोक इति

ध्वो = ५

लिकालनेन

पुरा दृप्तत्वाभावदशायां सिंहस्य कथंचित्ततो देशान्निर्गमनं संभावितं ~~[struck]~~ सिंहस्य निर्बलत्वात् अधुना तु तस्य दृप्ततया निर्गमनं स
र्वथाऽसंभावितमिति भा
वः

स॰ तदेतदग्रे यथायथं प्रतनिष्याम इत्यास्तां तावत् भ्रमेति श्वति सृष्टोपि शापसत्ते भ्रमणकालः धार्मिकेति अस्त्रमाशुपयोगार्थं शुक्ते
सा लो ते भ्रमणम् विस्रब्ध इति शंकाकारणवैकल्यात् स इति यस्ते भयप्रकम्पामंगलनिकामकृत श्वेति दिष्ट्यावधं से इत्यर्थः
मारित इति पुनरस्या दुःस्थानं तेनेति यः पूर्वं कर्णोपकर्णिकया त्वयाप्याकर्णितो गोदावरीकच्छगहने प्रतिवसतीति प्र
१५ र्वमेव हि तद्रत्तायेपततत्रयामे श्राविनोसावधुना तु दृप्तत्वात्तत्रो गहनान्निःसरतीति प्रसिद्धगोदावरीपरिसरानुसरणमपिता
वत्कथाशेषीभूते का कथा तद्गहनागहनप्रवेशशंकाया इति भावः ॥ ५ ॥

१५

आवयोरित्यर्थे   प्रसङ्गात् अतएव   मह स्त

श्वश्रूरत्र शेते अथवा निमज्जति अत्राहं दिवसकं प्रलोकय मा पथिक रात्र्यन्ध शय्यायामावयोर्मंक्षीः प्राविष्टा वा मा इति निषे-
धो नेकार्थः ह्निरत्रे नन्ममेति एवं हि निषेधवचनमेव शंकाकारि भवेदिति प्रच्छन्नाभ्युपगमो न स्यात् कश्चित्प्रोषितप-
तिकां तरुणीमवलोक्य प्रवृद्धमदनाङ्कुरः सम्मन्नः पान्थोऽनेन निषेधद्वारेण तयाभ्युपगत इति निषेधाभावोऽत्र विधिः न तु निमे-
त्रणरूपोऽथवा स्वतेनास्वभावः सौभाग्याभिमानवेदनापदेशाद्वैव शय्यायामेति समुचितसमय संभाव्यमानविकाराकुलितत्वे
ध्वनितम् यद्वाहं भद्रनायकोऽहमित्यभिनयविशेषेण मदनदशावेदनाच्छादनमेतदपि इत्यत्राहमिति नावच्छेदस्वनाये साक्षा-
दर्थः काकादिसहायस्य वा तावतिध्वननमेव व्यापार इति ध्वनेर्भूषणमेतत् अत्रेति प्रयत्नेनानिभृतसंभोगपरिहारः अथ

वाच्ये   श्वश्रूः अत्र ननु शेते अत्र अहं दिवसकं प्रलोकय

अकामित्वं निषेधरूपे विधिरूपो यथा ॥ अत्ता इत्थ णिमज्जइ इत्थ अहं दिअसअं पुलोएहि

मा व थिक रात्र्यन्ध शा व्या यां आवयोः स थि ष्या

मा पहिअ रत्तिअन्धअ सिज्जए मह णिमज्जिहिसि १०॥

अपि भवान्मदनपारवश्यादीर्घमाणोऽदयरूपेहि तं नयु मस्तथापि किं करोमि पापो दिवसकोपमन्त्रचिन्तनात् ज्ञात्सिनो य
मित्यर्थः शाङ्गने पुंनपुंसकयोरनियमः न च सर्वथा त्वमपेक्ष्यो यतो वैवाहं नत्र लोकेन विनोदेन दिनेनावदतिवाह यावद्
त्यर्थः प्रतिपन्नमात्रायांवरात्रौ अन्धीभूतो मदीयां शय्यां माक्षिप्ताः अपितु निभृतमेनहृत्ताभिधान निकटे के ढक निदान्वे
षणपूर्वकमिति रपदत्रयध्वन्यते १०॥   व=

त्य

ध॰ व्रजममैवैकस्याभवंततनिःश्वासरोदितश्वानि मातर्वापितयाविनादाक्षिण्यएवहन्तस्वजनिष्यत मुत्रमजेतिविधिःनत्र
ध्वालो मादादेवनायिकांतरसंगमनं तव श्रपितगाफानुरागादेवान्याहृइमखरागो गोत्रस्खलनादिर्वकेवलं पूर्वं कृता
१५
15

व्रज मम एव एक स्याभवंत निःश्वा सरो दित श्वानि मा त

क्वचिद्वाच्ये विधिरूपेण भयरूपो यथा व्रजममैवैकस्याभवन्तु निःश्वासरोदितव्यानि मात

वा पि तया विना दा क्षि ण्य ह त स्व जनि ष्य त

र्वापि तया विना दाक्षिण्यहतस्य जनिषत ॥ ११ ॥

नुपालनान्मना दाक्षिण्ये नैक रूपना भिमाने नैव त्वम त्र क्षित स्तन्मर्व या शको सौ ति गाफ मन्युरूपो यं खंडितनायिकाभि

प्रायोत्र प्रतीयते नचासौ विध्यभावरूपो निषेधो नापि विध्यन्तरमत्र निषेधाभावः ॥ १२ ॥ १५

ध्यन्तरमन्यत्र निषेधाभावात्

देशैरिति निपातः प्रार्थनायां आइ इति तावच्छब्दार्थे तेनायमर्थः प्रार्थये प्रसीद तावत् निवर्त्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे
अभिसारिकाणां विघ्नं करोषि अन्यासामपि हताशे अत्राप्यवसितान्निवर्त्तस्वेति प्रतीतेर्निषेधो वाच्यः इह नागरनायिकागोत्र
स्खलितनायकापराधिनि नायके सति ततः प्रतिगन्तुं प्रवृत्ता नायकेन चाटूपक्रमपूर्वकं निवर्त्यते न केवलं स्वात्मनो मम च निर्वृ
त्या विघ्नं करोषि यावदन्यासामपि नितम्बवत्कचवनं न स्वरवलवलाभोपि भविष्यतीति पवादः हताशासीति वल्लभाभिप्रायरू
पश्चाद् विशेषो व्यंग्यः यदि वा मत्कोपदिष्टमानापि तद्वृधीरणया गच्छन्ती मत्कोप्यते न केवलमात्मनो विघ्नं करोषि लाघवा
दवहूमानमात्मानं कुर्वतो मम न पवहताशा यावद्वदनचन्द्रिकाप्रकाशितमार्गतया अन्यासामभिसारिकाणां विघ्नं करोषीति सख्य
भिप्रायरूपश्चाद् विशेषो व्यंग्यः अत्र व्याख्यानद्वयेपि व्यवसितास्वीयगमनाभिप्रायमुद्दिश्य गमनान्निवर्त्तस्वेति पुनरपि वाच्य
प्रार्थये प्रसीद निवर्त्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे
कचिद्वाच्यप्रतिषेधरूपेण भयरूपो यथा देआ पसिअ णिअत्तसु मुहससिजोह्णाविलुत्ततमणिवहे
हे अभिसारिकाणां विघ्नं करोषि अन्यासामपि हताशे
एवं विभ्रान्तेर्ष्या भूत्वा गमने दर्शयेत्(?) वेहे अहिसारिआण विग्घं करोसि अण्णाण वि हआसे ॥१२॥ सवदत्तेकार
णो दाहवलंस्या प्रथनेः तेनायमत्र भावः कापि इभसाक्षियतममभिवेतीतह्रहामिमुखमागच्छतानेनैव सुलदयवल्लभेनैवमनुपन्नो
क्तो ते अन्यभिज्ञानच्छलेन अनेपवालस्यतिमिज्ञापनार्थमेवनमेवववर्नेहुताशेइति अन्यासां च विघ्नं करोषि न च ते स्मितलाभो भवि
ष्यति इति काप्याशा अतएवमदीयं वा इहमागच्छ त्वदीयं वा गच्छाव इति उभयत्रापि नास्येयादनुभयरूपो वल्लभाभिप्रायः वाहात्मा
वेगयइत्येव व्यवतिष्ठते अन्येनु तटस्थानां सहृदयानामभिसारिका प्रतीयमुक्तिरिस्याहुः तदुक्तमाशइन्यामंगुलादिगुरुक्रमयुक्तेवेति
सहृदयापवश्रमाणे एवं वाच्यव्यंग्ययोर्धर्म्मिकपाम्यस्थियतमाभिसारिकाविषयैकोपि स्वरूपविरोधाद्भेदइति प्रतिपादितं अधुनातविष
यभेदादपि व्यंग्यस्य वाच्याद्भेदइत्याह कचिद्वाच्यादित्यवस्थापितइति विषयभेदोपि विचित्ररूपो व्यवतिष्ठमानः सहृदयैर्व्यवस्थाप

[illegible] १२

धन्या लो श॰ कस्यवेतिश्चनीर्ष्यालोरषिनभवति रोषोहष्टेतिकृत्वापिकृतस्मिंदेवापूर्वनयाप्रियायाः सव्रणमधरमवलोकसभ्रमरपद्माघ्राण
शीलेशीलंहिकथंचिदपिवारयितुंनशक्यम् वारितेवारणायांहेवामेतदंगीकारिणिसहस्वेदानीं उपालंभपरंपराम्भितयेव
श्चायंभावः काचिदविनीताकृतस्मिन्नुत्वोतेनाथवा निभ्रिनतम्मविषयसंविधानेभर्तेविनदनवलोकमानयेवकयाविदि
१९ दग्धसख्यातद्वाच्यतापविहारायेतदुच्यते सहस्वेदानीमितिवाच्यमविनयवतीविषयं भर्तृविषयम्यवपराधोनास्तीत्यावेद्य
16 मानंव्यंग्यम् तस्यांवप्रियतमेनगाढमुपालभ्यमानायांतद्वालीकशंकितशान्तिवेशिमकलोकविषयंवाविनयप्रच्छादनेन

व्यव — कस्य वा न भवति रोषः दृष्ट्वा प्रियायाः सव्रणम

क्वचिद्वाच्याद्विभिन्नविषयत्वेनव्यवस्थापितोयथा कस्सवणहोइरोसो दट्ठूणपिआएसव्वणंअ

धरम् सभ्रमरपद्म घ्राण शीले वारितवामे सहस्वेदानीम्

हरम् सभमरपउम्घाइरिवारिअवामेसहसुइण्हिं सी १३ ॥

प्रत्यायनंव्यंग्यम् तत्सपत्न्यांवतदुपालंभनदविनयप्रख्याप्यांसौभाग्यातिशयप्रख्यापनंप्रियायाइतिशाब्दत्वादितिसपत्नी ध्व
विषयंव्यंग्यम् सपत्नीमध्येइयनावखलीकृता स्मीतिलाघवमात्मनियहीतंनगुरुंप्रम्यतायंवद्धमानः सहस्वशोभस्वेद लो
नीमिति सखीविषयंसौभाग्यख्यापनंव्यंग्यम् अयेयंतवपक्षवान्रागिणीएदयवहभाइत्यंरहिताप्रनःप्रकटरदनदशन
विधिरत्ननगुरूइविनम्रौर्यकामुकविषयंसंवापनंव्यंग्यं इत्थमेयेनदपङ्कमिति सवैदग्ध्यख्यापनेनतस्याविदग्धलोकविषयंव्यंग्य। १९

तदेवमुक्तं व्यवस्थापितशब्देन अग्रे इति द्वितीयोद्योते असंलक्ष्यक्रमो व्यंग्यः क्रमेण द्योतितः पर इति विवक्षितान्यपर।
वाच्यस्य द्वितीयप्रभेदवर्णनावसरे यथा हि विधिनिषेधतदुभयात्मनानुरूपेण संकलय्य वस्तुध्वनिः संक्षेपेणास्य वचनस्तथा।

डें अन्ये चैवंविधाः प्रकारा वाच्याद्विभेदिनः प्रतीयमानभेदाः संभवंति तेषां दिङ्मात्रमेतत्प्रद
र्शितम् द्वितीयोऽपि प्रभेदो वाच्याद्विभिन्नः सप्रपंचमग्रे दर्शयिष्यते तृतीयस्तु रसादिलक्षणः
प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव तथा
हि वाच्यत्वं तस्य शब्दनिवेदितत्वेन वा स्याद्विभावादिप्रतिपादनमुखेन वा पूर्वस्मिन्पक्षे स्वशब्दनिवे
दितत्वाभावे रसादीनामप्रतीतिप्रसंगः न च सर्वत्र तेषां स्वशब्दनिवेद्यत्वं यत्राप्यस्ति तत्रापि विशि
ष्टविभावादिप्रतिपादनमुखेनैवैषां प्रतीतिः स्वशब्देन केवलमनूद्यते न तु तत्कृता विषयांतरे
तथा तस्यादर्शनात् न हि केवलशृंगारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये
मनागपि रसवत्वप्रतीतिरस्ति ४ ॥

नालंकारध्वनिः अलंकाराणां भूयस्त्वान्न प्रत्येकं सप्रपंचमिति तृतीयस्त्विति शब्दो व्यतिरेके वस्त्वलंकारौ शब्दाभिधेयत्वमप्या

तावद्रसभावतदाभासतत्प्रशमाः। न तु ते कदाचिदभिधीयन्ते अथ चास्वाद्यमानशरीरतया प्रतिभान्ति तत्र ध्वननव्यापाराद्दृते
नास्ति कल्पनान्तरम् स्खलद्गतित्वाभावे मुख्यार्थबाधादेर्लक्षणानिबन्धनस्यानाशंकनीयत्वात् उक्तं विस्तरेण पूर्वं। चित्त
वृत्तेरास्वाद्यत्वे स्थायिनो रसो व्यभिचारिणो भावः। अनौचित्येन तदाभासः रावणस्येव सीतायां रतेः यद्यपि तत्र हास्यरसरूपतै
व श्रृंगाराद्धि भवेद्धास्य इति वचनात् तथापि पाश्चात्येयं सामाजिकानां स्थितिः तन्मयीभवनदशायां तु रतेरेवास्वाद्यतेति श्रृंगार
तैव भाति पौर्वापर्यविवेकावधीरणेन दूराकर्षणमोहमन्त्र इव मे तन्नाम्नि याते श्रुतिमित्यादौ तदाभासो श्रृंगाराभास एव यत्कान्ताया
हृदयमाह्लादयति यतो विशेषेण तत्प्रशमः संगृहीतोपि पृथग्गणितोऽसौ यथा ॥ एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं
ताम्यतोरन्योन्यं हृदयस्थितेप्यनुनये संरक्षतोर्गौरवम् दंपत्योः शनकैरपांगवलनान्मिश्रीभवच्चक्षुषोर्भग्नो मानकलिः स
हासरभसव्यासक्तकण्ठग्रहः ॥ इत्यत्रेर्ष्यारोषात्मनो मानस्य प्रशमः। न चायं रसादिरर्थः पुत्रस्ते जात इत्यतो यथा
हर्षो जायते तथा नापि लक्षणया अपि तु सहृदयस्य सहृदयसंवादबलाद्विभावप्रतीतेस्तन्मयीभावेनास्वाद्यमान एव
चर्व्यमाणैकप्राणः सिद्धस्वभावसुखादिविलक्षणः परिस्फुरति तदाह प्रकाशन इति तेन तत्र शब्दस्य ध्वननमेव
व्यापारोऽर्थस्य सहृदयस्येति विभावाद्यर्थोऽपि तद्गतजन्मसदृशन्यायेन तां चित्तवृत्तिं जनयतीति जननातिरिक्तोऽर्थस्यापि
व्यापारो ध्वननमेवोच्यते स्वशब्देति श्रृंगारादिनाभिधाव्यापारवशादेव निवेदितत्वेनेति विभावादीनितात्पर्यपाक्षेप
र्थः ॥ २

तत्रस्वशब्दस्यान्वयव्यतिरेकौ रस्यमानतासारं रसं प्रतिनिराकर्तव्यौ तन्नस्यैव तावदिति दर्शयति नचसर्वत्रेति यथाम द्वेईराज
स्य यद्विस्मयस्यविलोकितेषुबहुशो निःस्थेमनी लोचने यद्गात्राणिदरिद्रतिप्रतिदिनं लूनाब्जिनीनालवत् दूर्वाकांडविडंब
कश्चनिबिडोयत्पांडिमागंडयोः कृष्णेयूनिसयौवनासुवनितास्वेषैववेशस्थितिः ॥ इत्यत्रानुभावविभावावबोधनो
त्तरमेवतन्मयीभावनयुक्त्यातद्विभावानुभावोचित चित्तवृत्तिवासनानुरंजितस्वसंविदानन्दचर्वणागोचरोर्थोरसात्मास्फु
रत्येव अभिलाषचिंतौत्सुक्यनिद्राधृतिग्लान्यालस्यश्रमस्मृतिवितर्कादिशब्दाभावेपि एवंव्यतिरेकाभावंप्रदर्श्यान्वया।
भावंदर्शयति यत्रापीति तत्रादिनिस्वशब्दनिवेदितत्वम् प्रतिपादनमुखेनेतिशब्दप्रयुक्त्याविभावादिप्रतिपत्तेरस्यार्थः
साकेवलमिति तथाहि यातेद्वारवतींतदामधुरिपौतद्दत्तझम्पानतांकालिंदीतटरूढवंजुललतामालिंग्यसोत्कं
ठया उद्गीतंगुरुबाष्पगद्गदगलत्तारस्वरंराधया येनांतर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम् ॥ इत्यत्रविभावानुभा
वमुखेनैवतयाप्रतिपत्तृकर्वत उत्कंठाचर्वणागोचरंप्रतिपद्यतएव सोत्कंठशब्दः केवलंसिद्धंसाधयति तर्कामित्यनेनतत्कान्त
भावानुकर्षणेसोत्कंठशब्दःप्रयुक्तइत्यनुभावोपिनानर्थकः पुनरनुभावप्रतिपादनेहिपुनरुक्तमतन्मयीभावोवा ननुनतू
तेत्यत्रचेतनमाह विषयांतरइति यद्विश्रम्भसमादौनहियदभावेपियद्भवति तत्कृतंतादृशिभावः प्रदर्शनमेवदूषयति नही
तिकेवलशब्दार्थंस्फुरयतिविभावादीति काव्यइतितत्वमनेकाव्यरूपतयाप्रयुज्यमानइत्यर्थः मनागपीति ॥ शृंगार
हास्यबीभत्सरौद्रवीरभयानकाः करुणाद्भुतशांतानवनाट्यरसाः स्मृताः इत्येवेस्वशब्देनसहरसादेर्व्यतिरेकान्वया
भावमुपदर्शितमेवोपसंहरति यतश्चेत्यादिना कथंचिदित्यनेन १५ ॥

ध्वन्या- अभिधेयमेव सामर्थ्यं सहकारिशक्तिरूपं विभावादिकं रसध्वनने शब्दस्य कर्तव्ये अभिधेयस्य च तज्जन्महर्षाभिन्नयोग
लोच- हेमन्तयाजननव्यतिरिक्ते दिवाभोजनाभावविशिष्टपीनत्वानुमितरात्रिभोजनविलक्षणानयाचानुमानव्यतिरिक्ते ध्वन
१८ नेकर्तव्ये सामर्थ्यं शक्तिविशिष्टसमुचितवाचकसाकल्यमिति द्वयोरपि शब्दार्थयोर्ध्वननव्यापारः एवं द्वौ पक्षावुपक्र
म्याद्यो दूषितः द्वितीयस्तु कथं विदे गोंकृतः जननानुमानव्यापाराभिप्रायेण दूषितः ध्वननाभिप्रायेणांगीकृतः यस्त्वा

ॐ यतश्च स्वाभिधानमन्तरेण केवलेभ्यो विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः केवला।
च्च स्वाभिधानमात्रादप्रतीतिः तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसा।
दीनां न त्वभिधेयत्वं कथंचिदिति तृतीयोऽपि प्रभेदो वाच्याद्भिन्न एवेति स्थितं वाच्येन त्वस्य स
हैव प्रतीतिरित्यग्रे दर्शयिष्यते १५ ॥

पि नान्यथा शक्तिमेव ध्वननं मन्यते सन्न वस्तुतत्त्ववेदी विभावानुभावप्रतिपादके हि वाक्ये तात्पर्यशक्तिः भेदसंसर्गे वा पर्यव
स्यन्ती न रसस्यमानतासारे रसे इत्यलं बहुना इति शब्दो हेत्वर्थः इति अतो हेतोस्तृतीयोऽपि प्रकारो वाच्याद्भिन्न एवेति संबन्धः
सहैवेति इव शब्देन विद्यमानोऽपि क्रमो न संलक्ष्यत इति दर्शयति अग्रे इति द्वितीयोद्योते ॥ १५ ॥ १८

मान=

हासव्याजेनैव दर्शयति काव्यस्यात्मेति स एवेति प्रती
यमानेपि=१

एवंप्रतीयमानेपुनरन्यदेवेति इयताध्वनिस्वरूपंव्याख्यातं अधुनाकाव्यात्मत्वमितिप्रक्रांतेतृतीयपक्षेसध्वनिरिति
मंतव्यमितिहासबलात्प्रक्रांतंहृन्निगम्यार्थंबलादाहृतेनवसएववस्तुतआत्मावस्तुत्वलंकारध्वनीतरसंप्रतिपर्यवसानइतिवा

काव्यस्यात्मासएवार्थस्तथाचादिकवेःपुराक्रौंचद्वंद्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥
विविधविशिष्टवाच्यवाचकरचनाचारुणःकाव्यस्यसारभूतः सएवार्थः सन्निहितसहचरीविर
हकातरक्रौंचाक्रन्दजनितःशोकएवश्लोकतयापरिणतः ॥ मानिषादप्रतिष्ठांत्वमगमः
शाश्वतीःसमाः यत्क्रौंचमिथुनादेकमवधीःकाममोहितम् ५ ॥

व्याङ्ग्यत्वेनाविन्त्यभिप्रायेणध्वनिःकाव्यस्यात्मेतिसामान्येनोक्तम् शोकइति क्रौंचस्यद्वंद्ववियोगेनसहचरीहननोद्भूतेन
साहचर्यध्वंसनेनउत्थितोयःशोकःस्थायिभावोनिरपेक्षभावत्वाद्विप्रलंभशृंगारोचितस्याविभावत्वाद्नयएव सएवतथाभूतः।

ध्वन्या
लो प्र
१९

विभावस्तद्व्याक्रंदादिश्चानुभावश्चर्वणया हृदयसंवादतन्मयीभवनक्रमादास्वाद्यमानतां प्रतिपन्नः करुणरसरूपतां लौ
किकशोकव्यतिरिक्तां स्वचित्तद्रुतिसमास्वाद्यसारां प्रतिपन्नो रसः परिपूर्णकुंभोच्छलनवच्चित्तवृत्तिनिःष्यंदस्वभाव
वाग्विलापादिवत्समयानपेक्षत्वेपि चित्तवृत्तिव्यंजकत्वादिति नयेनाकृतकतयैवावेशवशात्समुचितशब्दच्छन्दोवृत्तादि
नियंत्रितश्लोकरूपतां प्राप्तः मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौंचमिथुनादेकमवधीः काममोहि
तमिति न तु मुनेः शोक इति मंतव्यम् एवं हि सति तद्दुःखेन सोपि दुःखित इति कृत्वा रसस्यात्मतेति निरवका
शं भवेत् न च दुःखसंतप्तस्यैषा दशेति एवं हि चर्वणोचितशोकस्थायिभावात्मककरुणरससमुच्छल
नस्वभावत्वात्स एव काव्यस्यात्मा सारभूतस्वभावोपरशाब्दवैलक्षण्यकारकः एतदेवोक्तं हृदयदर्पणे यावत्
पूर्णो न चैतेन तावन्नैव वमत्यमुमिति छान्दसेनागमेन सर्वविशेषवकाशेदमाह नान्यस्मात् तेन यदाह भट्ट
नायकः शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः अर्थतत्त्वेन युक्तं तु वदंत्याख्यानमेतयोः द्वयोर्गुणत्वे व्यापा
रप्राधान्ये काव्यधीर्भवेत् तदपास्तं व्यापारो हि यदि ध्वननात्मा रसनास्वभावस्तन्नापूर्वमुक्तं अभिधैव व्यापारस्तथाप्य
स्याप्राधान्यमेवेत्यावेदितं प्राक् श्लोकं व्याचष्टे विविधेति विविधं तदभिव्यंजनीयरसानुगुण्येन विचित्रकत्वा वाच्य
वाचकरचनायां च प्रपंचचारुणा हृद्यालंकारगुणगुम्फितमित्यर्थः तेन सर्वज्ञापिनधनसज्ञापिनपव्यवहारः आत्मसज्ञावे
पि द्विकविदेवज्ञीवव्यवहार इत्युक्तं भागोवतेनेन तन्निरवकाशं यदुक्तं हृदयदर्पणे सर्वथा हि काव्यव्यवहारः स्यादिति
निहतसहचरीति विभाव उक्तः आक्रंदितशब्देनानुभावः जनित इति चर्वणागोचरत्वेनेति शेषः ॥१९॥ १९

19

ननु शोकचर्व्वणातो यदि श्लोकतद्भूतः तत्प्रतीयमानं वस्तु काव्यस्यात्मेति कुतः इत्याशंक्याह शोकोहीतिकरुणरसनस्थुर्वं।
णागोच्चरात्मनः शोकः स्थायिभावः शोकेहि स्थायिभावे यदि विभावानुभावाः तत्समुचितावितचवृत्तिः चर्व्वणात्मा रस इत्यौ।
चित्यात् स्थायिनो रसतापत्तिरित्युच्यते शोकस्वसंविदितं परगतानुमितं च चित्तवृत्तिजातं संस्कारक्रमेणहृदयसंवादमादधानं
चर्व्वणायामुपयुज्यते यतः ननु प्रतीयमानरूपमात्मा तस्य त्रिभेदं प्रतिपादितं न तु रसैकरूप मनेनचेतिहासेन रसस्यैवात्म
भूतत्वमुक्तं भवतीत्याशंक्याभ्युपगमेनैवोत्तरमाह प्रतीयमानस्यचेति अन्योभेदोवस्त्वलंकारात्मा भावग्रहणं व्यभिचा

ॐ शोकोहि करुणरसस्थायिभावः प्रतीयमानरूप एवेति प्रतिपादितम् प्रतीयमानस्यचान्यभे
द प्रदर्शनेपि रसभावमुखेनैवोपलक्षणं प्राधान्यात् १७ ॥

रितोपि चर्व्यमाणस्तावन्मात्राविश्रान्तोपि स्थायिचर्व्वणापर्यवसानोहितरसशक्तिसामनयाप्यापि प्राणकत्वं भवतीत्यु
क्तम् यथा नवेनवागेणवियद्धयंती विवर्तयेतीवलयं विलोलम् प्रामेंमाशिंजितनूपुरेणपादेनमन्दंभुवमालिखे
ती इत्यत्र लज्जया रसभावशब्देनचतदाभासतत्प्रशमावपिसंगृहीतावेव प्रधानतयैवविश्रान्तेनदेकरूपत्वात् प्राधान्यादिति
रसपर्यवसानादित्यर्थः तावन्मात्रविश्रान्तावपिचान्यशब्दैवलक्षणकारित्वेनवस्त्वलंकारध्वनेरपिजीवितत्वमौ
चित्यमक्रमितिभावः १८ ॥

ता ह्न

अं वस्तुतत्त्व

ध्वन्या- एवमितिहासमुखेन प्रतीयमानस्य काव्यात्मतां प्रदर्श्य स्वसंवित्सिद्धमप्येतदिति दर्शयति सरस्वतीति वाग्रूपा भगवती
लोच- त्यर्थः अर्थशब्देन वस्तुशब्दं वस्तुशब्देन तत्त्वशब्दं च वस्तुशब्दमाचष्टे निष्यन्दमानेति दिव्यमानन्दरसं स्वयमेव प्रस्नु
वानेत्यर्थः यदाह भट्टनायकः वाग्धेनुर्दुग्ध एतं हि रसं यद्बालतृष्णया तेन नास्य समः स स्याद्दुह्यते योगिभिर्हि यः तदा
२- वेशेन विनाप्याक्रान्त्या हि योगिभिर्दुह्यते अत एव यं सर्वे शैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे इत्यनेन सा
